# Lokokti Sangrahah

# લોકોક્તિસઙ્ગ્રહઃ

## Document Information

Text title : Lokokti Sangrahah

File name : lokoktisangrahaH.itx

Category : subhAShita, subhaashita, sangraha, advice

Location : doc_z_misc_subhaashita

Author : Shvetaranya Narayana

Proofread by : Mandar Mali

Description/comments : From Vrittalamkararatnavali by Shvetaranya Narayana

Latest update : June 9, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 9, 2024

*sanskritdocuments.org*

Lokokti Sangrahah

# લોકોક્તિસઙ્ગ્રહઃ

શ્રીરામાય નમઃ ।

૧. અનિર્ણયન્ત્રકે ગ્રામે મધુપુષ્પં હિ શર્કરા ।

૨. પ્રકુઞ્ચ્યાપિ પથા ગમ્યમ્ ।

૩. સન્દગ્ધા અપિ ચિકુરાઃ સઞ્જાયેરન્કિમિઙ્ગાલાઃ ।

૪. એકગ્રામે દ્વાવુન્મત્તૌ ।

૫. હિઙ્ગુપાત્રમપશ્યઃ કિં વિપ્ર ભિક્ષાર્થમાગત ।

૬. આત્મશેષે ધર્મકૃત્યમ્ ।

૭. વિનાયકં પ્રકુર્વાણો રચયામાસ વાનરમ્ ।

૮. કાક્યાશ્ચાપિ સ્વશિશુઃ સ્વર્ણમ્ ।

૯. નહિવન્ધ્યા વિજાનાતિ ગુરૂ પ્રસવવેદનામ્ ।

૧૦. બલિનસ્તૃણમાયુધમ્ ।

૧૧. સ્વયં તરિતુમક્ષમઃ કિમુ પરાનસૌ તારયેત્ ।

૧૨. પક્ષિયોગ્યો રામશરઃ ।

૧૩. વિરતાયામપિ વૃષ્ટૌ નહિ શાખાનાં પૃષન્તિ વિરતા નિ ।

૧૪. સર્વ કાર્ય તિષ્ઠતુ વૃદ્ધં કારય સામ્પ્રતમકારૂઢમ્ ।

૧૫. જ્યેષ્ઠાગમનપર્યન્તમમા કિં હિ વિલમ્બતે ।

૧૬. ભિક્ષુકપિઠરં શનિરાવિશતિ ।

૧૭. ગુણાઃ પૂજાસ્થાનં ગુણિષુ ન ચ લિઙ્ગં ન ચ વયઃ ।

૧૮. પુરુષાધિક્યે પાકાધિક્યમ્ ।

૧૯. પ્રણિપાતપ્રતીકારઃ સંરમ્ભો હિ મહાત્મનામ્ ।

૨૦. સ્યાદુષ્ણીષં શિરસો યોગ્યમ્ ।

૨૧. હેમ્નસ્સંલક્ષ્યતે હ્યગ્નૌ વિશુદ્ધિશ્શ્યામિકાઽપિ વા ।

૨૨. લક્ષ્મ્યાગમને બન્ધ્વાગમનમ્ ।

૨૩. કિમિવહિ મધુરાણાં મણ્ડનં નાકૃતીનામ્ ।

૨૪. એકો મુષ્ટિગ્રાહો મૂર્ખે ।

૨૫. કોષ્ટુનટનસમ્પત્તુ કર્કટપ્રાણહાનિકૃત્ ।

૨૬. શ્રેયાંસિ બહુવિઘ્નાનિ ।

૨૭. આલયસ્થાયિમાર્જારો દેવતાયા બિભેતિ કિમ્ ।

૨૮. અનિર્વેદસ્સિદ્ધિમૂલમ્ ।

૨૯. ક્ષીરં સર્પાય દદ્યાચ્ચેત્સ સર્પો વિષમુદ્રેઇત્ ।

૩૦. સર્વસ્સર્વં ન જાનાતિ ।

૩૧. વિનાયકાલયં મૃજ્યાન્ન તત્રોચ્ચારમાચરેત્ ।

૩૨. ઉષ્ણમુષ્ણેન શામ્યતિ ।

૩૩. તીક્ષ્ણત્વાપાદકે વૃક્ષે તીક્ષ્ણત્વસ્ય પરીક્ષણમ્ ।

૩૪. અહિપાદાનહિત્તિ ।

૩૫. એકૈકશઃ શતં કિંવા યોગપદ્યેન કિં શતમ્ ।

૩૬. રત્નહારી તુ પાર્થિવઃ ।

૩૭. ઉત્સૃજ્ય નગરં ગ્રામે રત્નાનાં હિ પરીક્ષણમ્ ।

૩૮. કામી સ્વતાં પશ્યતિ ।

૩૯. પતેદામ્રશલાટુઃ કિં મન્ત્રે પ્રોચ્ચારિતે સતિ ।

૪૦. સતિ કુડ્યે ચિત્રકર્મ ।

૪૧. શુષ્કે પિચણ્ડે ભુઞ્જીત તુરઙ્ગોઽપિ પલાલકમ્ ।

૪૨. કોઽતિભારસ્સમર્થાનામ્ ।

૪૩. ઉભયોરજયોસ્સ્તન્યં પીતવાનયમર્ભકઃ ।

૪૪. કિં દૂરં વ્યવસાયિનામ્ ।

૪૫. તપસ્સ્થિતાનાં સુલભં હિ સર્વમ્ ।

૪૬. કો વિદેશઃ સવિદ્યાનામ્ ।

૪૭. સત્સ્વર્દનં ફલમદોહૃદમેવ સૂતે ।

૪૮. કઃ પરઃ પ્રિયવાદિનામ્ ।

૪૯. ક્ષુધિતશ્ચાપિ શાર્દૂલો ન કુર્યાત્તૃણભક્ષણમ્ ।

૫૦. યત્રાકૃતિસ્તત્ર ગુણાઃ ।

૫૫. પ્રવાહો નૂતનઃ પ્રનં પ્રવાહશ્ચાપ્યનાશયત્ ।

૫૨. દુષ્કરં કિં મહાત્મનામ્ ।

૫૩. સ્વસુઃ પુત્રઃ સ્વપુત્રશ્ચેત્કિમર્થં તપસિ શ્રમઃ ।

૫૪. ભીતાઃ બિભ્યતિ સર્વતઃ ।

૫૫. અશ્વઃ પાદેન ખઞ્જોઽપિ કુલુત્થગિરણે પટુઃ ।

૫૬. સાધ્વી જ્યેષ્ઠાઽઽચાર્યપત્ની ।

૫૭. પુરશ્ચૂડસ્ય વિપ્રસ્ય શિખા કમ્પેત કિં વૃથા ।

૫૮. જ્યેષ્ઠાપિ ભાર્યા કાલોપયોગા ।

૫૯. વિશ્વપ્રસિદ્ધવિપ્રસ્ય કિં કેશબ્રહ્મસૂત્રકમ્ ।

૬૦. કૂપઃ ખાતો ભૂતો જાતઃ ।

૬૧. દ્રષ્ટુ વ્રણં કરગતં મુકુરઃ કિમર્થઃ ।

૬૨. ગતયો ભિન્નપથા હિ દેહિનામ્ ।

૬૩. અગ્નિહોત્રસ્ય ચ કૃષેરપિ નાસ્ત્યનુરૂપતા ।

૬૪. અર્ચકદત્તં યત્તત્તીર્થમ્ ।

૬૫. વટકાનાં તુ ગણનં ન રન્ધ્રાણામુદીરિતમ્ ।

૬૬. વૃદ્ધા નારી પતિવ્રતા ।

૬૭. શ્રેષ્ઠા ભુક્તિશ્ચ સેવા ચ ભેષજસ્ય ત્ર્યહ સ્મૃતા ।

૬૮. મ્લેચ્છવીથ્યાં ભિક્ષુભિક્ષા ।

૬૯. શાતું સ્વકં પૃષ્ઠદેશં પાટવં નાસ્તિ કસ્યચિત્ ।

૭૦. અઙ્ગુલિયોગ્યઃ શ્વયથુઃ ।

૭૧. આ કણ્ઠમપિ બન્ધુત્વે હસ્તં વક્ષસિ મા ક્ષિપ ।

૭૨. ભિક્ષા ભિક્ષોર્નચાલાબ્વાઃ ।

૭૩. રાસભસ્ય પુરીષં હિ જાયતે હોમસાધનમ્ ।

૭૪. હિંસિતં હિંસ્યતે પદમ્ ।

૭૫. મોદકે છેદમાપ્નેઽપિ તદ્રુચિર્નૈવ યાસ્યતિ ।

૭૬. નાશિતં નાશ્યતે કુલમ્ ।

૭૭. ભાણ્ડે વક્રત્વમાપ્નેઽપિ કિં ન પચ્યેત મોદકમ્ ।

૭૮. વિપ્રાઃ પશ્ચિમબુદ્ધયઃ ।

૭૯. સર્ષપે સત્યપિ સ્વલ્પે તત્કટુત્વં ન ગચ્છતિ ।

૮૦. સમ્માર્જન્યાઃ પદરજ્જુઃ ।

૮૧. પ્રક્ષાલનાદ્ધિ પઙ્કસ્ય દૂરાદસ્પર્શનં વરમ્ ।

૮૨. બાલ્યે રમ્યો ગર્દભોઽપિ ।

૮૩. ગૃહીત્વા તણ્ડુલાન્ જ્યેષ્ઠભગિનીબન્ધુતા તુ કા ।

૮૪. એકો ભેકો ઘટસર્પાણામ્ ।

૮૫. વિષ્ણુશાકઃ પાદપણો ભરભૃત્યા ત્રિપાત્પણા ।

૮૬. ઉષ્ટ્રસ્યાઙ્ગં સર્વં  વક્રમ્ ।

૮૭. કૂપસ્થિતસ્ય ભેકસ્ય કા રાષ્ટ્રસ્ય વિચારણા ।

૮૮. કાર્પાસો વસ્ત્રમફલત્ ।

૮૯. ગ્રામં ગતે કર્ષણયોગ્યભદ્રે તત્રાપિ તં કર્ષણમેવ કારયેત્ ।
૯૦. નદીપ્રવાહે પૂર્ણેઽપિ લીઢ્વા પાનક્રિયા શુનઃ ।
૯૧. દિનેદિને કિં સૂપાન્નમ્ ।
૯૨. પિતામહી શયીત ચેદ્ગૃહસ્ય રક્ષિકા ભવેત્ ।
૯૩. સ્વાપરાધં નવેત્તિ સ્વઃ ।
૯૪. તામ્રચૂડં તાડયિતું મહાયષ્ટિઃ કિમિષ્યતે ।
૯૫. સંશયાત્મા વિનશ્યતિ ।
૯૬. સ્થિત્વોચ્ચરેચ્ચેદાચાર્યોધાવિત્વા શિષ્ય ઉચ્ચરેત્ ।
૯૭. સઙ્ગ્રહી નાવસીદતિ ।
૯૮. બાલૈઃ કૃતાયાસ્તુ કૃષેઃફલં કિં ગૃહમાવ્રજેત્ ।
૯૯. દુષ્ટં ચેતઃ સાશઙ્કં સ્યાત્ ।
૧૦૦. યદિ વહ્નિરિતિ બ્રૂયાદાસ્યં પચ્યેત કિં તદા ।
૧૦૧. પુનરાયાન્મહાકપિઃ ।
૧૦૨. કિં વાર્ષિકાન્ધકારેઽપિ કીશઃ શાખાં નલક્ષયેત્ ।
૧૦૩. મૂર્ખૈર્જલ્પો વાચઃ શ્રાન્ત્યૈ ।
૧૦૪. નર્તકતનૂજંશિક્ષયસિનૃત્તમ્ ।
૧૦૫. અન્યન્નયાતિહિવિભૂતિરપત્યભાજામ્ ।
૧૦૬. આર્ષોગર્ભોનોવિલમ્બેતરાત્રૌ ।
૧૦૭. મધુગ્રાહી કૂપરં કિન્નલિહ્યાત્ ।
૧૦૮. ઉષ્ણોદકસ્ય સેકેન કિન્દોતં  નિકેતનમ્ ।
૧૦૯. કુક્કુરપુચ્છં સમ્યઙ્નનમેત્ ।
૧૧૦. જ્યેષ્ઠાર્જિતં કનિષ્ઠસ્ય કટિસૂત્રાય નાપ્યલમ્ ।
૧૧૧. ફટાટોપોભયઙ્કુરઃ ।
૧૧૨. બધ્વારુદન્શુભે કિન્નુ તૂષ્ણીંસ્યાન્મૃતવેશ્મનિ ।
૧૧૩. ગાનં મૂઢશ્રોત્રે બાણઃ ।
૧૧૪. સ્વાનાર્જિતસ્ય સ્વર્ણસ્ય શુદ્ધિર્નચ મિતિ નચ ।
૧૧૫. કિન્દુર્મર્ષતિતિથૂણામ્ ।
૧૧૬. માધુર્યદર્શી માર્જારઃ પ્રતિશિક્યમભિવ્રજેત્ ।
૧૧૭. કિમકાર્યમસાધુભિઃ । રજક્યાં રજકસ્યાશા તસ્યાઆશાતુરાસમે ।
૧૧૮. વિશ્વસ્યાચ્ચૌર્યવન્તં વા ન વિશ્વસ્યાત્તુ વામનમ્ ।
૧૧૯. કિમદેયં વદાન્યાનામ્ ।
૧૨૦. ઉત્તરાભિમુખસૌધનિકેતનાદક્ષિણાભિમુખપર્ણકુટી વરા ।

૧૨૧. અપ્યતિક્ષુલ્લકં સર્પ મહાદણ્ડેન તાડય ।

૧૨૨. કઃ પરઃ સમદર્શિનામ્ ।

૧૨૩. પિપીલિકાનાં સ્પૃષ્ટયાપિ શિલાપ્યાઘર્ષિતા ભવેત્ ।

૧૨૪. નહિ વાચો દરિદ્રતા ।

૧૨૫. નદીમીક્ષેતચેદ્વિપ્રઉત્ક્રુશ્યોત્ક્રુશ્ય વૈ પતેત્ ।

૧૨૬. આખુઃપ્રાશઃખાત્વા શૈલમ્ ।

૧૨૭. એકાશીતિતમાલસ્ય કોટિભઙ્ગાય કલ્પતે ।

૧૨૮. ગતાનુગતિકો લોકઃ ।

૧૨૯. નોલઙ્ઘયતિ સીમાનં તિલ્લકાનનકન્યકા ।

૧૩૦. રસનાયાસ્સિરા કુતઃ ।

૧૩૧. પિટકાનાં સહસ્રસ્ય હન્તા ચ્છેત્તા ભિષક્સ્મૃતઃ ।

૧૩૨. ગુલભાણ્ડં સજેદંશઃ ।

૧૩૩. કુડવોઽપિ નશિષ્યેત કર્ષકો ગણયેદ્યદિ ।

૧૩૪. સવાતે ધૂનયેત્કાલે ।

૧૩૫. પાનક્રિયા યવાગ્વાતુ ગણ્ડૂષો હિમનીરતઃ ।

૧૩૬. નરદૃશ્વા પયોનિધિઃ ।

૧૩૭. મૌક્તિકં કન્યકાપિ સ્યાત્શુલ્કં ચાપિ ભવેલઘુ ।

૧૩૮. પ્રત્યાપણં પુમાનેવ ।

૧૩૯. ચિત્રેપ્યનહશ્ચોલીયઃ ।

૧૪૦. ઉત્પાદકસ્ય કુમ્ભાનામનેકાન્દિવસાન્ક્રિયા ।

૧૪૧. ઉદ્ભેદકસ્ય કુમ્ભાનામેકમેવ ક્ષણં ક્રિયા ।

૧૪૨. કકલાસો વૃતેઃસાક્ષી ।

૧૪૩. પત્રતુમ્બી નિષિદ્ધાચેદ્બૃહતુગ્ચ્યાઃ કિમાગતમ્ ।

૧૪૪. બન્ધુભાવો રણે કુતઃ ।

૧૪૫. સિદ્ધમન્નં પરિત્યજ્ય ભિક્ષામટતિ દુર્મતિઃ ।

૧૪૬. યતિયાત્રા બહિર્વેદ્યામ્ ।

૧૪૭. હસ્તસ્થં પાયસં મુક્ત્વા કૂર્પરં લેઢિ દુર્મતિઃ ।

૧૪૮. કઙ્કસ્ય નાસા ખિદ્યેત ।

૧૪૯. ઋણં ગૃહીત્વાપ્યુપવાસ એવ ।

૧૫૦. નિષ્કુટૌષધિરગૌરવાસ્પદમ્ ।

૧૫૧. બિચ્છિન્દ્યાત્કિં કણ્ઠસૂત્રં દુઃખપ્રશ્નાર્થમાગતા ।

૧૫૨. વાગ્મી તનૂભવો જીવેત્ ।

૧૫૩. યત્ર ભુઙ્ક્તે ગૃહે તત્ર દ્વૈતમિષ્યેત કિંસ્વયમ્ ।
૧૫૪. નિદ્રાલુવત્સઃ પુંવત્સઃ ।
૧૫૫. કેન બન્ધયિતું શક્યં કુઞ્જરસ્યાલમલ્લકમ્ ।
૧૫૬. નિઃસ્પૃહસ્ય તૃણઞ્જગત્ ।
૧૫૭. તણ્ડુલાશ્ચેદ્વિકીર્યેરન્ સહસ્રં વાયસાસ્તદા ।
૧૫૮. અપૂર્ણઃ કલશો નૃત્યેત્ ।
૧૫૯. પ્રવેશ્ય વા મનં તોયે પરિપશ્યત્યગાધતામ્ ।
૧૬૦. પઞ્ચસુ દ્વે અબલ્બજે ।
૧૬૧. અનિષ્ટાયાસ્તુ ભાર્યાયાઃકરસ્પર્શેઽપિ દુષ્ટતા ।
૧૬૨. જ્ઞાનં ભારઃ ક્રિયાં વિના ।
૧૬૩. લેખિની કથયેત્ખઞ્જામજાનન્ લેખનં પુમાન્ ।
૧૬૪. ગુરોરતિક્રમી શિષ્યઃ ।
૧૬૫. પાકાયૈવાભવત્કાલ કાલો નાસ્ત્યૌષણ્યશાન્તયે ।
૧૬૬. વાદભ્રષ્ટો વૈદ્યશ્રેષ્ઠઃ ।
૧૬૭. વ્યાજભૂતં હિ ખઞ્જસ્ય વાજિનઃસ્ખલિતં સ્થલમ્ ।
૧૬૮. સ્કન્ધાદૃર્ધ્વ સખા ભવેત્ ।
૧૬૯. મહિષ્યામ્પ્રસવાર્તાયાં મહિષો મદનાતુરઃ ।
૧૭૦. ભુક્તિશ્રમો દૃઢસ્યાપિ ।
૧૭૧. પઞ્ચવક્ત્રે વને દૃષ્ટે કિં ચરેયુઃ પરે મૃગાઃ ।
૧૭૨. ચૌર્યમભ્યસ્ય વિસ્મર ।
૧૭૩. ભિત્તિશાકં મેલયિત્વા દુર્ધીર્વિશ્યે નિપાતય ।
૧૭૪. ભિક્ષાપાત્રં બૃહત્પાત્રમ્ ।
૧૭૫. દહ્યમાને ગૃહે વહ્નિ ધૂમપત્રાય યાચતે ।
૧૭૬. યુદ્ધકાર્યાય ગોગ્રહઃ ।
૧૭૭. ચટકાકિં ભવેત્કઙ્ગો ડયમાનોપ્યુપર્યલમ્ ।
૧૭૮. બાલવત્સો ન ભીતિજ્ઞઃ ।
૧૭૯. આગતાવાગતૌ શ્વધરભવદ્દર્દભી યથા ।
૧૮૦. ગજસ્ય ભાણ્ડસ્ય ચ સામ્યમાત્તમ્ ।
૧૮૧. યાવનાલસમુત્પન્ના લાજાઃ કિઙ્કુઞ્જરક્ષુધઃ ।
૧૮૨. મૃત્તિકાધનજામાતુર્ભક્ષણં શુષ્કગોશકૃત્ ।
૧૮૩. પ્રતિવાદિપદે પાતો વરં સાક્ષ્યનિપાતતઃ ।
૧૮૪. પ્રાપ્યેઽપિ કુટ્ટને શ્વાઘ્યં કુદ્દનં સોમિકૈ કરૈઃ ।

૧૮૫. વિશ્રાણનીયં ભિષજે દ્રવિણં દેહિ ચક્રિણે ।

૧૮૬. ભોજને પુરતસ્તિષ્ઠ પશ્ચાત્તિષ્ઠ નિષેવણે ।

૧૮૭. જાતસ્યાપિ ગિરૌ ધાન્યસ્યાવઘાત ઉલૂખલે ।

૧૮૮. નિરસ્તમાનવે ગ્રામે હયમેધં કરોત્યયમ્ ।

૧૮૯. વિદ્વાનેવ વિજાનાતિ વિદ્વદ્જનપરિશ્રમમ્ ।

૧૯૦. ય એવ ગવાં નિવર્તને પ્રભવતિ સ એવ ધનઞ્જયઃ ।

૧૯૧. અયોધનં ગિરેદાખુઃ કાકશ્ચેચ્છિશુમુદ્ધરેત્ ।

૧૯૨. શિલાગજાનનં દશેત્સદન્તભઙ્ગમાપ્નુયાત્ ।

૧૯૩. ન કર્તકં પઙ્કપ્રસાદનાય ।

૧૯૪. પૃથુકં સ્મૃત્વા ધુલૂખલમવહન્તિ ।

૧૯૫. માર્ગિતા લતા પાદયોઃ પ્રોતા ।

૧૯૬. અખણ્ડં કૂશ્માણ્ડમન્નમધ્યે છાદયસિ ।

૧૯૭. પ્રાચીને કાણે કવાટમપાવૃણુ ।

૧૯૮. અયમપરો ગણ્ડસ્યોપરિ પિટકોદઃ ।

૧૯૯. દિગમ્બરદેશે કૌપીનવાનુન્મત્તઃ ।

૨૦૦. અન્યદુપક્રાન્તમન્યદાપતિતમ્ ।

૨૦૧. ન શણસૂત્રવાનાભ્યાસે પ્રસરસૂત્રવૈચિત્ર્યલાભઃ ।

૨૦૨. રત્નાકરેઽપિ ક્ષારભાવઃ ।

૨૦૩. ગિરિ નિગીર્ણવતો મહાદેવસ્ય કવાટમેકં પર્પટમ્ ।

૨૦૪. ફલં ગલિતં પયસિ પ્રપાત ।

૨૦૫. લૂતાતન્તુના ગન્ધગજાલાનસન્દાનમ્ ।

૨૦૬. સૂચીતુણ્ડેન વજ્રમણિભેદઃ ।

૨૦૭. વહ્નિરેવ વહ્નેવભેષજમ્ ।

૨૦૮. નહિ તરણિકર્સ્પર્શાદન્યો વ્યાધિરિન્દીવરવનસ્ય ।

૨૦૯. પ્રયોગપરતન્ત્રા હિ કાર્યસિદ્ધિઃ ।

૨૧૦. અલવિતુઃકટ્યામષ્ટપઞ્ચાશલ્લવિત્રાણિ ।

૨૧૧. ગર્દાસ્પદં હિ ગ્રામસ્ય ગણેશાલયભિક્ષુકઃ ।

૨૧૨. પુષ્પેણ સહ સૂત્રમપિ સુરભિઃ ।

૨૧૩. પુરુષવિશેષપરિષઙ્ગોત્કર્ષિણ્ય એવ પુરન્ધ્યો ભવન્તિ ।

૨૧૪. ઈર્ષ્યાયિતં હિ સુન્દરીણાં પ્રકાશકં પ્રેમસર્વસ્વસ્ય ।

૨૧૫. ન કાલહરણક્ષમાઃ પ્રિયસમાગમમહોત્સવાઃ ।

૨૧૬. ભવિતવ્યાનાં દ્વારાણિ ભવન્તિ સર્વત્ર ।

૨૧૭. ઇખં ભક્ષયિતુમપિ ભૃતિઃ કિમ્ ।

૨૧૮. કૈતકસમ્પર્કાત્સિવયમપિ કિમપ્યામોદતે ।

૨૧૯. લોકોભિન્નરુચિઃ ।

૨૨૦. નાવોપિ શકટમારોહેત્ શકટમપિ નાવમારોહેત્ ।

૨૨૧. મૂકાજલ્યકશ્ચાણ્ડપ્રચણ્ડઃ ।

૨૨૨. ફલિષ્યત્સસ્યમઙ્કુરોદયે દૃશ્યમ્ ।

૨૨૩. કાષ્ઠતાડનેન દન્તભઙ્ગો જાતઃ ।

૨૨૪. આમ્રાન્પૃષ્ટઃ કોવિદારાનાચ ।

૨૨૫. અધઃ પતતોઽપિ શ્મશ્રુણિ રણુન મતઃ ।

૨૨૬. મેયશૂન્યે હસ્તે કિં કિષ્કુમાન ।

૨૨૭. તવ ગૃહમાગચ્છેયં ચેકિં દદાસિમે ।

૨૨૮. મમ ગૃહમાગચ્છેશ્ચેકિમાનયસિ મે ।

૨૨૯. યવાગ્વામપ્યાશા શ્મશ્રુણ્યપ્યાશા ।

૨૩૦. કાશીં ગતમપિ કર્મ ન મુઞ્ચેત્ ।

૨૩૧. અભિસારિકેતિ ગજમારુહ્ય ગચ્છેત્ ।

૨૩૨. ચૌર્યવતીતિ વીથ્યાં ગન્તું શક્નુયાકિ ।

૨૩૩. સમુદ્રે ક્ષિપ્તમપિ કલશં પૂરણીયમેવ જલં પૂરયેત્ ।

૨૩૪. નૌકાવાણિજ્યતો જાતમૃણં કિં નિવર્તેત કાર્પાસતન્તુકરણેન ।

૨૩૫. શિવમિતવિત્તનરસ્ય ભાર્યા ભૂત્વા કિં દ્રોણમિતવિત્તાશાં કર્તુમર્હેત્ ।

૨૩૬. અત્યલ્પમપિ તૃણં દન્તનિર્ઘર્ષણાર્હમ્ ।

૨૩૭. ગર્દભોપદેશઃ કર્ણમૂલમાજગઃ ।

૨૩૮. મશકસ્ય પિટકે જાતે છેદો દાહો વા કિયાન ।

૨૩૯. નિમ્ને સ્થલે તિષ્ઠતે જલમ્ ।

૨૪૦. કૂપનીરં પ્રવાહો નાપહરેત્ ।

૨૪૧. ગોપુરં પાઞ્ચાલિકા વા ધારયતિ ।

૨૪૨. યદિ શ્વશ્રૂભિન્દ્યાત્તદા મૃદ્ભાણ્ડં યદિ સ્નુષા ભિન્દ્યાત્તદા કાંસ્યભાણ્ડ ।

૨૪૩. સતસ્તતસ્ત્રયો માર્ગાઃ દ્વૌ મા વસતસ્સતઃ એકોઽસતોઽસતો માર્ગઃ ।

૨૪૪. ધાવન્તં ગ્રામમનુધાવેત્ ।

૨૪૫. નિર્મિતસ્ય સદનસ્ય સમ્યકાર્યત્વોક્તિઃ ।

૨૪૬. જીર્ણપર્ણરાશિમધ્યક્ષિપ્તસ્યાપિ ગુઞ્જાફલસ્ય શોભા નાપગચ્છેત્ ।

૨૪૭. જનન્યષ્ટપદાનિ કામ્યેચ્ચેદ્વત્સઃ ષોડશ પદાનિ કામ્યેત્ ।

૨૪૮. જામાત્રે પાચિતમન્નં પુત્રાય પરિવેષ્ય કુક્ષિતાપમુપાગમત્ ।

૨૪૯. વૃષભ ઇતિ ભાષમાણમપિ પૃચ્છતિ વત્સાય કુડવમિતં ક્ષીરમ્ ।

૨૫૦. નદ્યા યોજનદૂરેપ્યલમલ્લકમખ્સયત્ ।

૨૫૧. મિક્ષિત્વાપિ ભિક્ષવે દેહિ ।

૨૫૨. ભિક્ષુરપવરકે તિષ્ઠેત્ ભિક્ષુભસ્રિકા રથ્યાયાં તિષ્ઠેત્ ।

૨૫૩. ઇક્ષવે કૃષ્ટા મૃત્તિકા કિં તસ્રસ્ય ક્ષીરસ્ય શર્કરા ભવેત્ ।

૨૫૪. અશ્વત્થં પ્રદક્ષિણીકુવણઇવ કુક્ષિમૂલમામૃશતિ ।

૨૫૫. યવાગ્થૈ સ્થિતાન્ તણ્ડુલાન્ દત્વા કક્ષરોમાણ્યવાપયત્ ।

૨૫૬. આરે આરે વિતિ વદન્નરોઽગ્નૌ કિં પતિષ્યતિ ।

૨૫૭. રોગિવાગભ્રમારોહેત્કિમ્ ।

૨૫૮. તત્કાલકાર્યસ્ય બુદ્ધિયૂન્ના ।

૨૫૯. જવેન રઙ્ગવલ્યર્થં પિષ્ટમાદાય વિકિર ।

૨૬૦. કોચ્ચ્યાં શિવમરીચિશ્ચેદત્ર કિમ્ ।

૨૬૧. તૃણાનિ કિમુ બધ્યેરન્ગોશ્ચરન્ત્યાઃ વિષાણયોઃ ।

૨૬૨. આષાઢવાતે શિલાયાં ડયમાનાયાં શાલ્મલીકાસઃકિયાન્ ।

૨૬૩. ઉક્ત્વા દત્તા વાચા બધ્વા દત્તં ચાન્નં કતિ દિનાનિ તિષ્ઠેતામ્ ।

૨૬૪. દૃષ્ટારનાલં સ્થલમદિરૈશઃ દૃષ્ટૌદનં સ્થાનમમયમ્પત્તનમ્ ।

૨૬૫. ભુક્તયે સમાગતા દેવતા ગ્રામદેવતાં નિરકાસયત્ ।

૨૬૬. એહ્યેહીતિ વનં વક્તિ ગચ્છગચ્છેતિ મન્દિરમ્ ।

૨૬૭. બાલસિંહોઽપિ બધ્વા કિં ચાર્યેત ।

૨૬૮. શિલાયાં વલ્કસૂત્રમુત્પાદયેત્ સિકતાઃ રજ્જુમાપાદયેત્ ખં શરાસં મણ્ડલીકુર્યાત્ ।

૨૬૯. બહિન્બહિન્નિત્યુક્તે બહીં બર્હ દદ્યાકિમ્ ।

૨૭૦. ભિક્ષુમતાડયત ડયતે સ્મ કન્થા ।

૨૭૧. ભર્તા તા। ડયતિ સ્મ નેત્રમલં નશ્યતિ સ્મ ।

૨૭૨. મૃતેઽપિ પુત્રે સ્નુષાદૌષ્ટયં વ્યરમત્ ।

૨૭૩. તિલાસ્તૈલાર્થમાતપે શોષ્યન્તે કિમર્થમાખુકરીષા। ણિ ।

૨૭૪. માતરં દૃષ્ટા દુહિતરં નિશ્ચિનુ ।

૨૭૫. અસ્માત્તીરાદદસ્તીરં હરિતમ્ ।

૨૭૬. અજાશ્ચેત્પારમુત્તરેયુઃ કિમેકમપ્યજાવત્સલોમ વિતરેયમ્ ।

૨૭૭. કારવીથ્યાં સૂચીવિક્રયો વા ।

૨૭૮. કારચુલ્યાં મક્ષિકાઃ કિં સજેયુઃ ।

૨૭૯. સજલવ્યયઃ કૂપઃ સજલોદ્ગમઃ ।

૨૮૦. અંવષ્ટસદને રોમ્ણાં ન્યૂનતા કિમ્ ।

૨૮૧. વિહાય લાભં કિં શ્રેષ્ઠી સરિતા સહ યાસ્યતિ ।
૨૮૨. કાકાદ્ભીતિમતી કઙ્કાદ્ધૈર્યવતી ।
૨૮૩. ઇક્ષુર્ભધુરઇત્યામૂલં ખન્યેત વા ।
૨૮૪. મર્તું યાસ્યતો મહોદધિરૂરુમાત્રઃ ।
૨૮૫. સાઙ્કામિકઃ પિટકઃ સ્પર્શમાત્રેણ સઙ્ક્રામેત્ ।
૨૮૬. ચિકોડઃ શાખાયાં કૂર્મઃ કૂપે ।
૨૮૭. કણ્ઠરજ્જુ વિમુચ્ય વાલમધારયઃ ।
૨૮૮. હસ્તે નવનીતં નિધાય ઘૃતાય ચરતિ ।
૨૮૯. જલાવતારે યદિ દૃશ્યેત માતા તદા સુતા સદને કિન્નુ દૃશ્યા ।
૨૯૦. વૃક્ષં સ્થાપિતાન્ જલં સિઞ્ચેત્ ।
૨૯૧. વાલમાકમ્પયેદ્દ્હે માર્જારોડપિ કૃતાશને ।
૨૯૨. સ્થિતં યાત્રે દત્વા દેવરે ભિક્ષાર્થમરોદીત્ ।
૨૯૩. અગ્નૌ મન્દાગ્નિમહાગ્નિર્વા ।
૨૯૪. નદ્યાં પાતયન્નપિ મિત્વા પાતયેત્ ।
૨૯૫. ચલત્સુ દન્તેષુ નિવર્તતે ક્ષુત્ ।
૨૯૬. નિરસ્તપાદપે દેશે ધેરણ્ડોડપિ દ્રુમાયતે ।
૨૯૭. પિતુર્ભુક્તિ પાત્રં મહાનસે ન્યુજમ્ ।
૨૯૮. સહસ્રશ્રાદ્ધનાશી સામિગ્રામયાજી ।
૨૯૯. જામાતેતિ કથિતં તૃણમુન્નમેત્ ।
૩૦૦. કુબેરસદનેડપિ મૃન્મય્યેવ ચુલ્લી ન કનકમયી ।
૩૦૧. કન્યાડપિ સ્યાત્કમનીયા કિઞ્ચિદપિ સ્યાત્તચ્છુલ્કમ્ ।
૩૦૨. સહસ્રરૂપ્યમૂલ્યકો ગજઃ સ્થિતો મૃતોડપિ વા ।
૩૦૩. ગૌરપિ તનીયસી સ્યાત્પલાલમપ્યલ્પં ચરેત્ પ્રભૂતં પયશ્ચ પ્રદદ્યાત્ ।
૩૦૪. વૃશ્ચિકે બાલેડપિ તદ્વિષમબાલમ્ ।
૩૦૫. શ્મશાનવાસી સં। ન્યાસી કિં વેતાલાદિયાદ્ભયમ્ ।
૩૦૬. પ્રાતિવેશિકે વૃદ્ધિમુપગતે પઞ્ચ દિનાનિ નિરાહારો ભવેત્ ।
૩૦૭. તાલીવનસૃગાલઃ કિં બિભીયાચ્ચલચલધ્વનેઃ ।
૩૦૮. આગતં શિરસે યાતં શિરસ્ત્રાણેન વૈ સહ ।
૩૦૯. મૂલ્યમપિ સ્વલ્પં સ્યાન્મૌક્તિકાનિ સ્યુરનલ્પાનિ ।
૩૧૦. અનધીતે (અધીતેડપિ)મહાભાષ્યે વ્યર્થા સા પદ્મઞ્જરી ।

ઇતિ શ્વેતારણ્યનારાયણયજ્વનઃ કૃતિષુ લોકોક્તિસઙ્ગ્રહઃ પૂર્ણઃ ।

Proofread by Mandar Mali

*Lokokti Sangrahah*

pdf was typeset on June 9, 2024

Please send corrections to *sanskrit@cheerful.com*